श्रीः । श्रीमते रामानुजाय नमः ।

श्रीभाष्ये जिज्ञासाधिकरणे अविद्या-वादः ।

तत्र *निवर्तकानुपपत्तिः* ।।

आविष्णोरभिवन्द्यादावाचार्याणां परम्पराम् । वेदाचार्यं च मे तातं पराङ्कुश-सदाह्वयम् ।।
वेदान्तदेशिकान्वन्दे यतीन्द्राननुकम्पिनः । यत्कृपालेशतः सोऽहं मन्दो भाष्यमुदीरये ।।
लक्ष्मणाचार्य-सूरींश्च भावये हृदि सादरम् । यैरेव शास्त्रसरणौ व्युत्पत्तिः प्रतिपादिता ।।
सच्चक्रवर्तिनः सम्यक् भाष्यार्थ-विशदीकृतौ । अद्वितीयान्प्रणम्याहम् उद्युञ्जे विषयेऽत्र वै ।।
यदृच्छया मयाप्यात्ता यत्कृपा ह्युपनायने । तच्छताब्दि-महे वादे नूनं हेतूयते तया ।।

*आश्रय-तिरोधि-रूप-अनिर्वचनीयेषु स-प्रमाणेषु । विनिवर्तक-विनिवृत्त्योः सप्तानुपपत्तयो ह्यविद्यायाः ।।

*अनन्यानां पुंसाम् अनवधिक-भक्ति-स्थिति-जुषाम् अविद्या-ध्वंसो यच्चरण-वरिवस्या-परिणतेः ।
तदेकं सत्-संवित्-सुखम् अवधि-दूरीकृत-गुणं हताशेषावद्यं हयवदनम् ईडीमहि महः ।। [श.दू. ४३ वादः]

## ६. निवर्तकानुपपत्तिः ।।

[निर्विशेष-ब्रह्मात्मैक्य-ज्ञानस्य निवर्तकत्व-परत्वेन परोक्त-श्रुतीनाम् अतदर्थत्वं वक्तुं तदुक्तानुवादः]

यत् उक्तम् - निर्विशेष-ब्रह्म-विज्ञानात् एव अविद्या-निवृत्तिं वदन्ति श्रुतयः इति, [परिहारः] तत् असत् । [ज्ञानस्य निर्विशेष-वस्तु-विषयत्वं न, विग्रहादि-विशिष्ट-विषय-ज्ञानम् एव उपायः] [1]वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय ।, [2]सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।, [3]न तस्येशे कश्चन तस्य नाम महद्यशः ।, [4]य एनं विदुरमृतास्ते भवन्ति इत्याद्यनेक-वाक्य-विरोधात् । ब्रह्मणः स-विशेषत्वात् एव सर्वाणि अपि वाक्यानि स-विशेष-ज्ञानात् एव मोक्षं वदन्ति । शोधक-वाक्यानि अपि स-विशेषम् एव ब्रह्म प्रतिपादयन्ति *इति उक्तम्* ।।

[तत्त्वमस्यादौ जीव-परैक्य-विषयत्व-व्युदासः । चतुर्धा सामानाधिकरण्यं परोक्तं, शोधक-वाक्येषु सामानाधिकरण्यम् अतद्-व्यावृत्ति-मुखेन वस्त्वैक्य-परं, तत्त्वमस्यादिषु जीव-ब्रह्मणोः सामानाधिकरण्यम् अन्वय-मुखेन उपलक्षित-वस्त्वैक्य-परं, अचित्-ब्रह्मणोः सर्वं खल्विदं ब्रह्म इत्यादिषु अ-तात्त्विक-रूप-आरोपणेन सामानाधिकरण्यं, ज्योतींषि विष्णुः इत्यादौ बाधार्थं सामानाधिकरण्यम् इति ।] [तत्त्वमस्यर्थ-शोधनम्]

[तत्र निर्विशेष-वस्त्वैक्य-परत्व-दूषणम्] तत्त्वमस्यादि-वाक्येषु सामानाधिकरण्यं न निर्विशेष-वस्त्वैक्य-परम्, तत् त्वं पदयोः स-विशेष-ब्रह्माभिधायित्वात् । तत्-पदं हि सर्वज्ञं सत्य-सङ्कल्पं जगत्-कारणं ब्रह्म परामृशति - [5]तदैक्षत बहु स्याम् इत्यादिषु तस्य एव प्रकृतत्वात् । तत्-समानाधिकरणं त्वं-पदं च अचित्-विशिष्ट-जीव-शरीरकं ब्रह्म प्रतिपादयति, प्रकार-द्वय-अवस्थित-एक-वस्तु-परत्वात् सामानाधिकरण्यस्य । प्रकार-द्वय-परित्यागे प्रवृत्ति-निमित्त-भेद-असंभवेन सामानाधिकरण्यम् एव परित्यक्तं स्यात् ; द्वयोः पदयोः लक्षणा च । 'सोऽयं देवदत्तः' इत्यत्र अपि न लक्षणा, भूत-वर्तमान-काल-संबन्धितया ऐक्य-प्रतीति-अविरोधात् । देश-भेद-विरोधः च काल-भेदेन परिहृतः । 'तदैक्षत बहु स्याम्' इति उपक्रम-विरोधः च । एक-विज्ञानेन सर्व-विज्ञान-प्रतिज्ञानं च न घटते । ज्ञान-स्वरूपस्य निरस्त-निखिल-दोषस्य सर्वज्ञस्य समस्त-कल्याण-गुणात्मकस्य अज्ञानं तत्-कार्य-अनन्त-अपुरुषार्थ-आश्रयत्वं च भवति । [बाधार्थत्वे दोषाधिक्यम्] बाधार्थत्वे च सामानाधिकरण्यस्य त्वं-तत्-पदयोः अधिष्ठान-लक्षणा निवृत्ति-लक्षणा च इति लक्षणादयः ते एव दोषाः ।।

इयान् तु विशेषः - 'न इदं रजतम्' इतिवत् अप्रतिपन्नस्य एव बाधस्य अगत्या परिकल्पनम्; तत्-पदेन अधिष्ठान-अतिरेकि-धर्म-अनुपस्थापनेन बाध-अनुपपत्तिः च । अधिष्ठानं तु प्राक् तिरोहितम् अतिरोहित-स्वरूपं तत्-पदेन उपस्थाप्यते इति चेत्, न, प्रागधिष्ठानाप्रकाशे तदाश्रय-भ्रम-बाधयोः असंभवात् । भ्रमाश्रयम् अधिष्ठानम् अतिरोहितम् इति चेत्; तत् एव अधिष्ठान-स्वरूपं भ्रम-विरोधि इति तत्-प्रकाशे सुतरां न तदाश्रय-भ्रम-बाधौ । अतः अधिष्ठान-अतिरेकि-पारमार्थिक-धर्म-तत्-तिरोधान-अनभ्युपगमे भ्रान्ति-बाधौ दुरुपपादौ । अधिष्ठाने हि पुरुष-मात्राकारे प्रतीयमाने तत्-अतिरेकिणि पारमार्थिके राजत्वे तिरोहिते सति एव व्याधत्व-भ्रमः । राजत्व-उपदेशेन च तत्-निवृत्तिः भवति ; न अधिष्ठान-मात्र-उपदेशेन ; तस्य प्रकाशमानत्वेन अनुपदेश्यत्वात् ; भ्रम-अनुपमर्दित्वात् च ।।

[स्व-पक्षे तत्त्वमस्यादेः मुख्यार्थत्वम्] जीव-शरीरक-जगत्-कारण-ब्रह्म-परत्वे मुख्य-वृत्तं पद-द्वयम् । प्रकार-द्वय-

विशिष्ट-एक-वस्तु-प्रतिपादनेन सामानाधिकरण्यं च सिद्धम् । निरस्त-निखिल-दोषस्य समस्त-कल्याण-गुणात्मकस्य ब्रह्मणः जीव-अन्तर्-यामित्वम् अपि ऐश्वर्यम् अपरं प्रतिपादितं भवति । उपक्रम-अनुकूलता च । एक-विज्ञानेन सर्व-विज्ञान-प्रतिज्ञा-उपपत्तिः च ; सूक्ष्म-चित्-अचित्-वस्तु-शरीरस्य एव ब्रह्मणः स्थूल-चित्-अचित्-वस्तु-शरीरत्वेन कार्यत्वात् [६]तमीश्वराणां परमं महेश्वरम्, [७]पराऽस्य शक्तिः विविधैव श्रूयते, [८]अपहत-पाप्मा ..... सत्य-कामः सत्य-सङ्कल्पः, इत्यादि-श्रुत्यन्तर-अविरोधः च ।।

"तत्त्वमसि" इति अत्र उद्देश्य-उपादेय-विभागः कथम् इति चेत्; न अत्र किञ्चित् उद्दिश्य किम् अपि विधीयते; [९]'ऐतदात्म्यमिदं सर्वम्' इति अनेन एव प्राप्तत्वात् । *अ-प्राप्ते हि शास्त्रम् अर्थवत्* । इदं सर्वम् इति स-जीवं जगत् निर्दिश्य ऐतदात्म्यम् इति तस्य एषः आत्मा इति तत्र प्रतिपादितम् । तत्र च हेतुः उक्तः - [१०]'सन्मूलास्सोम्येमास्सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति; [११]'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्तः' इतिवत् ।।

[तादात्म्यं शरीर-शरीरि-भाव-निबन्धनम्] तथा श्रुत्यन्तराणि च ब्रह्मणः तत्-व्यतिरिक्तस्य चित्-अचित्-वस्तुनः च शरीर-आत्म-भावम् एव तादात्म्यं वदन्ति - [१२]अन्तः-प्रविष्टः शास्ता जनानां सर्वात्मा, [१३]यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः, [१४]य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः, [१५]यः पृथिवीमन्तरे सञ्चरन् इति आरभ्य, [१६]यस्य मृत्युः शरीरं । यं मृत्युर्न वेद । एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः, [१७]तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । इत्यादीनि । अत्र अपि - [१८]अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणि इति ब्रह्मात्मक-जीव-अनुप्रवेशेन एव सर्वेषां वस्तुत्वं शब्द-वाच्यत्वं च प्रतिपादितम् । 'तदनुप्रविश्य । सच्च त्यच्चाभवत्' इति अनेन ऐकार्थ्यात् जीवस्य अपि ब्रह्मात्मकत्वं ब्रह्म-अनुप्रवेशात् एव इति अवगम्यते । [ऐतदात्म्य-शब्दार्थ-निगमनम्] अतः चित्-अचित्-आत्मकस्य सर्वस्य वस्तु-जातस्य ब्रह्म-तादात्म्यम् आत्म-शरीर-भावात् एव इति अवगम्यते । [शरीर-वाचि-शब्दानां शरीरि-पर्यन्तत्वम्] तस्मात् ब्रह्म-व्यतिरिक्तस्य कृत्स्नस्य तत्-शरीरत्वेन एव वस्तुत्वात् तस्य प्रतिपादकः अपि शब्दः तत्-पर्यन्तम् एव स्व-अर्थम् अभिदधाति । अतः सर्व-पदानां लोक-व्युत्पत्ति-अवगत-तत्तत्-पदार्थ-विशिष्ट-ब्रह्म-अभिधायित्वं सिद्धम् इति 'ऐतदात्म्यमिदं सर्वम्' इति प्रतिज्ञात-अर्थस्य "तत्त्वमसि" इति सामानाधिकरण्येन विशेषे उपसंहारः ।।

[मतान्तरेषु अनुपपत्तिः] अतः निर्-विशेष-वस्त्वैक्य-वादिनः भेदाभेद-वादिनः केवल-भेद-वादिनः च वैयधिकरण्येन सामानाधिकरण्येन च ब्रह्म-आत्म-भाव-उपदेशाः सर्वे परित्यक्ताः स्युः । [अद्वैत-पक्ष-दूषणम्] एकस्मिन् वस्तुनि कस्य तादात्म्यम् उपदिश्यते ? तस्य एव इति चेत्; तत् स्व-वाक्येन एव अवगतम् इति न तादात्म्य-उपदेश-अवसेयम् अस्ति किंचित् । कल्पित-भेद-निरसनम् इति चेत्; तत् तु न सामानाधिकरण्य-तादात्म्य-अवसेयम् इति उक्तम् । सामानाधिकरण्यं तु ब्रह्मणि प्रकार-द्वय-प्रतिपादनेन विरोधम् एव आवहेत् । [औपाधिक-भेदाभेद-वादे भास्करीये दोषाः] भेदाभेद-वादे तु ब्रह्मणि एव उपाधि-संसर्गात् तत्-प्रयुक्ताः जीव-गताः दोषाः ब्रह्मणि एव प्रादुः-स्युः इति निरस्त-निखिल-दोष-कल्याण-गुणात्मक-ब्रह्म-आत्म-भाव-उपदेशाः हि विरेधात् एव परित्यक्ताः स्युः । [स्वाभाविक-भेदाभेद-वादे यादवीये दोषाः] स्वाभाविक-भेदाभेद-वादे अपि ब्रह्मणः स्वतः एव जीव-भाव-अभ्युपगमात् गुण-वत् दोषाः च स्वाभाविकाः भवेयुः इति निर्दोष-ब्रह्म-तादात्म्य-उपदेशः विरुद्धः एव । [स्व-पर्यवसित-भेद-वादिनां वैशेषिकादीनां (तार्किकानां) पक्षे दोषाः] केवल-भेद-वादिनां च अत्यन्त-भिन्नयोः केन अपि प्रकारेण ऐक्य-असंभवात् एव ब्रह्मात्म-भावोपदेशाः न संभवन्ति इति सर्व-वेदान्त-परित्यागः स्यात् ।।

[शरीरि-पर्यन्ताभिधाने युक्तिः] निखिल-उपनिषत्-प्रसिद्धं कृत्स्नस्य ब्रह्म-शरीर-भावम् आतिष्ठमानैः कृत्स्नस्य ब्रह्मात्म-भावोपदेशाः सर्वे सम्यक् उपपादिताः भवन्ति । जाति-गुणयोः इव द्रव्याणाम् अपि शरीर-भावेन विशेषणत्वेन 'गौः अश्वः मनुष्यः देवः जातः पुरुषः कर्मभिः' इति सामानाधिकरण्यं लोक-वेदयोः मुख्यम् एव दृष्टचरम् । जाति-गुणयोः अपि द्रव्य-प्रकारत्वम् एव, 'खण्डः गौः', 'शुक्लः पटः' इति सामानाधिकरण्य-निबन्धनम् । मनुष्यत्वादि-विशिष्ट-पिण्डानाम् अपि आत्मनः प्रकारतया एव पदार्थत्वात् 'मनुष्यः पुरुषः षण्डः योषित् आत्मा जातः' इति सामानाधिकरण्यं सर्वत्र अनुगतम् इति प्रकारत्वम् एव सामानाधिकरण्य-निबन्धनम्, न परस्पर-व्यावृत्ताः जाति-आदयः । स्व-निष्ठानाम् एव हि द्रव्याणाम् कदाचित् क्वचित् द्रव्य-विशेषणत्वे मत्वर्थीय-प्रत्ययः दृष्टः, 'दण्डी कुण्डली' इति; न पृथक् प्रतिपत्ति-स्थिति-अनर्हाणां द्रव्याणाम्; तेषां

विशेषणत्वं सामानाधिकरण्य-अवसेयम् एव ।।

यदि 'गौः अश्वः मनुष्यः देवः पुरुषः योषित् षण्डः आत्मा कर्मभिः जातः' इति अत्र 'खण्डः मुण्डः गौः', 'शुक्लः पटः', 'कृष्णः पटः' इति जाति-गुणवत् आत्म-प्रकारत्वम् मनुष्यादि-शरीराणाम् इष्यते; तर्हि जाति-व्यक्त्योः इव प्रकार-प्रकारिणोः शरीर-आत्मनोः अपि नियमेन सह प्रतिपत्तिः स्यात्; न च एवं दृश्यते । नहि नियमेन गोत्वादिवत् आत्माश्रयतया एव आत्मना सह मनुष्यादि-शरीरं पश्यन्ति । अतः 'मनुष्यः आत्मा' इति सामानाधिकरण्यं लाक्षणिकम् एव । न एतत् एवम्; मनुष्यादि-शरीराणाम् अपि आत्मैकाश्रयत्वम्, तदेक-प्रयोजनत्वम्, तत्-प्रकारत्वं च जात्यादि-तुल्यम् । आत्मैकाश्रयत्वम् आत्म-विश्लेषे शरीर-विनाशात् अवगम्यते । आत्मैक-प्रयोजनत्वं च तत्-कर्म-फल-भोगार्थतया एव सद्भावात् । तत्-प्रकारत्वम् अपि 'देवः मनुष्यः' इति आत्म-विशेषणतया एव प्रतीतेः । एतत् एव हि गवादि-शब्दानां व्यक्ति-पर्यन्तत्वे हेतुः । एतत्-स्वभाव-विरहात् एव दण्ड-कुण्डलादीनां विशेषणत्वे 'दण्डी, कुण्डली' इति मत्वर्थीय-प्रत्ययः । देव-मनुष्यादि-पिण्डानाम् आत्मैकाश्रयत्व-तदेक-प्रयोजनत्व-तत्-प्रकार-स्वभावात् 'देवः मनुष्यः आत्मा' इति लोक-वेदयोः सामानाधिकरण्येन व्यवहारः । जाति-व्यक्त्योः नियमेन सह प्रतीतिः उभयोः चाक्षुषत्वात् । आत्मनः तु अचाक्षुषत्वात् चक्षुषा शरीर-ग्रहण-वेलायाम् आत्मा न गृह्यते । पृथक्-ग्रहण-योग्यस्य प्रकारतैक-स्वरूपत्वं दुर्घटम् इति मा वोचः; जात्यादिवत् तदेकाश्रयत्व-तदेक-प्रयोजनत्व-तद्विशेषणत्वैः शरीरस्य अपि तत्-प्रकारतैक-स्वभावत्व-अवगमात् । सहोपलम्भ-नियमः तु एक-सामग्री-वेद्यत्व-निबन्धनः इति उक्तम् । यथा चक्षुषा पृथिव्यादेः गन्ध-रसादि-संबन्धित्वं स्वाभाविकम् अपि न गृह्यते; एवं चक्षुषा गृह्यमाणं शरीरम् आत्म-प्रकारतैक-स्वभावम् अपि न तथा गृह्यते; आत्म-ग्रहणे चक्षुषः सामर्थ्य-अभावात् । न एतावता शरीरस्य तत्-प्रकारत्व-स्वभाव-विरहः । तत्-प्रकारतैक-स्वभावत्वम् एव सामानाधिकरण्य-निबन्धनम् । आत्म-प्रकारतया प्रतिपादन-समर्थः तु शब्दः सह एव प्रकारतया प्रतिपादयति ।।

ननु च शाब्दे अपि व्यवहारे शरीर-शब्देन शरीर-मात्रं गृह्यते इति न आत्म-पर्यन्तता शरीर-शब्दस्य । न एवम्; आत्म-प्रकार-भूतस्य एव शरीरस्य पदार्थ-विवेक-प्रदर्शनाय निरूपणात् निष्कर्षक-शब्दः अयम् ; यथा 'गोत्वम् शुक्लत्वम् आकृतिः गुणः' इत्यादि-शब्दाः ।। [वैवक्षिक-नियत-भेदेन द्विविधेषु निष्कर्षकेषु शरीरादि-शब्दाः नियत-निष्कर्षकाः]

अतः गवादि-शब्द-वत् देव-मनुष्यादि-शब्दाः आत्म-पर्यन्ताः । एवं देव-मनुष्यादि-पिण्ड-विशिष्टानां जीवानां परमात्म-शरीरतया तत्-प्रकारत्वात् जीवात्म-वाचिनः शब्दाः परमात्म-पर्यन्ताः । अतः परस्य ब्रह्मणः प्रकारतया एव चित्-अचित्-वस्तुनः पदार्थत्वम् इति तत्-सामानाधिकरण्येन प्रयोगः । अयम् अर्थः ***वेदार्थ-संग्रहे*** समर्थितः । इदम् एव शरीर-आत्म-भाव-लक्षणं तादात्म्यम् [१९]आत्मेति तूपगच्छन्ति ग्राहयन्ति च इति वक्ष्यति; [२०]आत्मेत्येव तु गृह्णीयात् इति च वाक्यकारः ।।

[स्व-सिद्धान्त-सार-उपन्यासः] अत्र इदं तत्त्वम् - अचित्-वस्तुनः चित्-वस्तुनः परस्य च ब्रह्मणः भोग्यत्वेन भोक्तृत्वेन च ईशितृत्वेन च स्वरूप-विवेकम् आहुः काश्चन श्रुतयः - [२१]अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यः मायया सन्निरुद्धः, [२२]मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्, [२३]क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः; अमृताक्षरं हरः इति भोक्ता निर्दिश्यते, प्रधानम् आत्मनः भोग्यत्वेन हरति इति हरः । [२४]स कारणं करणाधिपाधिपः न चास्य कश्चिज्जनिता न चाधिपः, [२५]प्रधानक्षेत्रज्ञपतिर्गुणेशः, [२६]पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम्, [२७]ज्ञाज्ञौ द्वावजावीशनीशौ, [२८]नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्, [२९]भोक्ता भोग्यं प्रेरितारं च मत्वा, [३०]तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति, [३१]पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति, [३२]अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः, [३३]समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः इत्याद्याः ।। [चित्-अचित्-ईश्वर-भेद-शरीर-आत्म-भाव-प्रमाणानि] स्मृतौ अपि -

[३४]अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ।।

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत् ।।

[३५]सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् । कल्पक्षये, पुनस्तानि कल्पादौ विसृजाम्यहम् ।।

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनःपुनः । भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ।।

[३६]मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् । हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते ।।

[३७]प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
[३८]मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् । सम्भवः सर्वभूतानां ततो भवति भारत ।।
जगद्योनि-भूतं महत् ब्रह्म मदीयं प्रकृत्याख्यं भूत-सूक्ष्मम् अचिद्वस्तु यत् ; तस्मिन् चेतनाख्यं गर्भं यत् संयोजयामि, ततः मत्-कृतात् चित्-अचित्-संसर्गात् देवादि-स्थावर-अन्तानाम् अचित्-मिश्राणां सर्व-भूतानां सम्भवः भवति इति अर्थः ।।

एवं भोक्तृ-भोग्य-रूपेण अवस्थितयोः सर्व-अवस्था-अवस्थितयोः चित्-अचितोः परम-पुरुष-शरीरतया तत्-नियाम्यत्वेन तत्-अ-पृथक्-सिद्धिं परम-पुरुषस्य च आत्मत्वम् आहुः काश्चन श्रुतयः - [३९]यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति इति आरभ्य, [४०]य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः इति । तथा [४१]यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरं यं पृथिवी न वेद इति आरभ्य, [४२]योऽक्षरमन्तरे सञ्चरन्यस्याक्षरं शरीरं यमक्षरं न वेद .. यो मृत्युमन्तरे सञ्चरन्यस्य मृत्युः शरीरं यं मृत्युर्न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः; अत्र मृत्यु-शब्देन तमः-शब्द-वाच्यं सूक्ष्म-अवस्थम् अचित्-वस्तु अभिधीयते ; अस्याम् एव उपनिषदि - [४३]अव्यक्तमक्षरे लीयते । अक्षरं तमसि लीयते इति वचनात् । [४४]अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा इति च ।।

[ब्रह्मणः कार्य-कारण-अवस्थत्वम्] एवं सर्व-अवस्था-अवस्थित-चित्-अचित्-वस्तु-शरीरतया तत्-प्रकारः परम-पुरुषः एव कार्य-अवस्थ-कारण-अवस्थ-जगत्-रूपेण अवस्थितः इति इमम् अर्थं काश्चन श्रुतयः कार्य-अवस्थं कारण-अवस्थं च जगत् सः एव इति आहुः - [४५]सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत इति आरभ्य, [४६]सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः । ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति । तथा [४७]सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । इति आरभ्य, [४८]सत्यं चानृतं च सत्यमभवत् इत्याद्याः ।।

अत्र अपि श्रुत्यन्तर-सिद्धः चित्-अचितोः परम-पुरुषस्य च स्वरूप-विवेकः स्मारितः - [४९]हन्ताहमिमा स्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि इति, - [५०]तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् ..... विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् इति च । 'अनेन जीवेन आत्मना अनुप्रविश्य' इति जीवस्य ब्रह्मात्मकत्वं, 'तदनुप्रविश्य सच्च त्यच्चाभवत्, विज्ञानं चाविज्ञानं च' इति अनेन ऐकार्थ्यात् आत्म-शरीर-भाव-निबन्धनम् इति विज्ञायते । एवंभूतम् एव नाम-रूप-व्याकरणं [५१]तद्धेदं तर्ह्यव्याकृतमासीत् । तन्नामरूपाभ्यां व्याक्रियत इति अत्र अपि उक्तम् । अतः कार्य-अवस्थः कारण-अवस्थः च स्थूल-सूक्ष्म-चित्-अचित्-वस्तु-शरीरः परम-पुरुषः एव इति कारणात् कार्यस्य अनन्यत्वेन कारण-विज्ञानेन कार्यस्य ज्ञाततया एक-विज्ञानेन सर्व-विज्ञानं समीहितम् उपपन्नतरम् । 'अहमिमास्तिस्रो देवता अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणि' इति 'तिस्रो देवता' इति सर्वम् अचित् वस्तु निर्दिश्य तत्र स्व-आत्मक-जीव-अनुप्रवेशेन नाम-रूप-व्याकरण-वचनात् सर्वे वाचकाः शब्दाः अचित्-विशिष्ट-जीव-विशिष्ट-परमात्मनः एव वाचकाः इति कारण-अवस्थ-परमात्म-वाचिना शब्देन कार्य-वाचिनः शब्दस्य सामानाधिकरण्यं मुख्य-वृत्तम् । अतः स्थूल-सूक्ष्म-चित्-अचित्-प्रकारं ब्रह्म एव कार्यं कारणं च इति ब्रह्म-उपादानं जगत् । सूक्ष्म-चित्-अचित्-वस्तु-शरीरकं ब्रह्म एव कारणम् इति ।।

ब्रह्म-उपादानत्वे अपि, संघातस्य उपादानत्वेन, चित्-अचितोः ब्रह्मणः च स्वभाव-असङ्करः अपि उपपन्न-तरः । यथा शुक्ल-कृष्ण-रक्त-तन्तु-संघात-उपादानत्वे अपि चित्र-पटस्य तत्-तत्-तन्तु-प्रदेशे एव शौक्ल्यादि-संबन्धः इति कार्य-अवस्थायाम् अपि न सर्वत्र वर्ण-सङ्करः ; तथा चित्-अचित्-ईश्वर-संघात-उपादानत्वे अपि जगतः कार्य-अवस्थायाम् अपि भोक्तृत्व-भोग्यत्व-नियन्तृत्वादि-असङ्करः । तन्तूनां पृथक्-स्थिति-योग्यानाम् एव पुरुष-इच्छया कदाचित् संहतानां कारणत्वं कार्यत्वं च । इह तु चित्-अचितोः सर्व-अवस्थयोः परम-पुरुष-शरीरत्वेन तत्-प्रकारतया एव पदार्थत्वात् तत्-प्रकारः परम-पुरुषः सर्वदा सर्व-शब्द-वाच्यः इति विशेषः । स्वभाव-भेदः तत्-असङ्करः च तत्र च अत्र च तुल्यः । एवं च सति परस्य ब्रह्मणः कार्य-अनुप्रवेशे अपि स्वरूप-अन्यथा-भाव-अभावात् अविकृतत्वम् उपपन्नतरम् । स्थूल-अवस्थस्य नाम-रूप-विभाग-विभक्तस्य चित्-अचित्-वस्तुनः आत्मतया अवस्थानात् कार्यत्वम् अपि उपपन्नतरम् । *अवस्थान्तर-आपत्तिः एव हि कार्यता* ।।

[स-गुण-निर्-गुण-प्रमाण-सामरस्यम्] निर्गुण-वादाः च परस्य ब्रह्मणः हेय-गुण-असंबन्धात् उपपद्यन्ते । [५२]अपहतपाप्मा

विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः इति हेय-गुणान् प्रतिषिध्य, 'सत्यकामः सत्यसङ्कल्पः' इति कल्याण-गुणान् विदधती इयं श्रुतिः एव अन्यत्रसामान्येन अवगतं गुण-निषेधं हेय-गुण-विषयं व्यवस्थापयति ।।

ज्ञान-स्वरूपं ब्रह्म इति वादः च सर्वज्ञस्य सर्व-शक्तेः निखिल-हेय-प्रत्यनीक-कल्याण-गुण-आकरस्य ब्रह्मणः स्वरूपं ज्ञानैक-निरूपणीयं स्वयं-प्रकाशतया ज्ञान-स्वरूपं च इति अभ्युपगमात् उपपन्नतरः । [५३]यस्सर्वज्ञस्सर्ववित्, [५४]परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, [५५]विज्ञातारमरे केन विजानीयात् इत्यादिकाः ज्ञातृत्वम् आवेदयन्ति; [५६]सत्यं ज्ञानम् इत्यादिकाः च ज्ञानैक-निरूपणीयतया स्व-प्रकाशतया च ज्ञान-स्वरूपताम् ।।

[५७]सोऽकामयत । बहु स्याम्, [५८]तदैक्षत बहु स्याम्, [५९]तन्नामरूपाभ्यां व्याक्रियत इति ब्रह्म एव स्व-सङ्कल्पात् विचित्र-स्थिर-त्रस-रूपतया नाना-प्रकारम् अवस्थितम् इति तत्-प्रत्यनीक-अ-ब्रह्म-आत्मक-वस्तु-नानात्वम् अतत्त्वम् इति तत् प्रतिषिध्यते - [६०]मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति, [६१]नेह नानाऽस्ति किञ्चन, [६२]यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्केन कं विजानीयात् इत्यादिना । न पुनः 'बहु स्याम्, प्रजायेय' इत्यादि-श्रुति-सिद्धं स्व-सङ्कल्प-कृतं ब्रह्मणः नाना-नाम-रूप-भाक्त्वेन नाना-प्रकारत्वम् अपि निषिध्यते । 'यत्र त्वस्य सर्वमात्मैवाभूत्' इत्यादि-निषेध-वाक्यादौ च तत् स्थापितम् - [६३]सर्वं तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद, [६४]तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः इत्यादिना ।।

एवं चित्-अचित्-ईश्वराणां स्वभाव-भेदं स्वरूप-भेदं च वदन्तीनां कार्य-कारण-भावं कार्य-कारणयोः अनन्यत्वं च वदन्तीनां सर्वासां श्रुतीनाम् अविरोधः, चित्-अचितोः परमात्मनः च सर्वदा शरीर-आत्म-भावं शरीर-भूतयोः कारण-दशायां नाम-रूप-विभाग-अनर्ह-सूक्ष्म-दशा-आपत्तिं कार्य-दशायां च तत्-अर्ह-स्थूल-दशा-आपत्तिं च वदन्तीभिः श्रुतिभिः एव ज्ञायते इति ब्रह्म-अज्ञान-वादस्य औपाधिक-ब्रह्म-भेद-वादस्य अन्यस्य अपि अप-न्याय-मूलस्य सकल-श्रुति-विरुद्धस्य न कथञ्चित् अपि अवकाशः दृश्यते । [विशिष्ट-वेषेण एव ऐक्यम्] चित्-अचित्-ईश्वराणां पृथक्-स्वभावतया तत्-तत्-श्रुति-सिद्धानां शरीर-आत्म-भावेन प्रकार-प्रकारितया श्रुतिभिः एव प्रतिपन्नानां श्रुत्यन्तरेण कार्य-कारण-भाव-प्रतिपादनं कार्य-कारणयोः ऐक्य-प्रतिपादनं च हि अविरुद्धम् । [वैदिक-दृष्टान्तेन उपपादनम्] यथा - आग्नेयादीन् षड्-यागान् [आग्नेयः, अग्नीषोमीय-उपांशु-याजौ, ऐन्द्रौ द्वौ, ऐन्द्राग्नः च] उत्पत्ति-वाक्यैः पृथग्-उपपन्नान् [यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्ममास्यां चाच्युतो भवति] समुदाय-अनुवादि-वाक्य-द्वयेन [य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजते] समुदाय-द्वयत्वम् आपन्नान्, [६५]'दर्श-पूर्णमासाभ्याम्' इति अधिकार-वाक्यं कामिनः कर्तव्यतया विदधाति; तथा चित्-अचित्-ईश्वरान् विभक्त-स्वरूप-स्वभावान् [६६]क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः, [६७]पतिं विश्वस्यात्मेश्वरम्, [६८]आत्मा नारायणः परः, इत्यादि-वाक्यैः पृथक् प्रतिपाद्य, [६९]'यस्य पृथिवी शरीरम्', [७०]'यस्यात्मा शरीरम्', [७१]'यस्याव्यक्तं शरीरम् । यस्याक्षरं शरीरम् । एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' इत्यादिभिः वाक्यैः चित्-अचितोः सर्व-अवस्था-अवस्थितयोः परमात्म-शरीरतां परमात्मनः तत्-आत्मतां च प्रतिपाद्य शरीर-भूत-परमात्म-अभिधायिभिः सत्-ब्रह्म-आत्म-आदि-शब्दैः कारण-अवस्थः कार्य-अवस्थः च परमात्मा एकः एव इति पृथक् प्रतिपन्नं वस्तु-त्रितयं [७२]सदेव सोम्येदमग्र आसीत्, [७३]ऐतदात्म्यमिदं सर्वम्, [७४]सर्वं खल्विदं ब्रह्म इत्यादि-वाक्यं प्रतिपादयति । चित्-अचित्-वस्तु-शरीरिणः परमात्मनः परमात्म-शब्देन अभिधाने हि न अस्ति विरोधः ; यथा मनुष्य-पिण्ड-शरीरकस्य आत्म-विशेषस्य 'अयम् आत्मा सुखी' इति आत्म-शब्देन अभिधाने इति अलम् अति-विस्तरेण ।।

स्वस्मै स्वप्रीतये स्वयमेव कारितवान् प्रीयतां भगवान् वासुदेवः ।।